<u>**शिक्षकाणां कार्योन्मुखीकरणवर्गः (Faculty Development Program - 1)**</u>

मुक्तस्वाध्यायपीठस्य शैक्षिकविकासकेन्द्रे नवनियुक्तानां **स्वागतसत्रं कार्योन्मुखीकरण- वर्गश्च** (१७-०२-२०२३ तः ०२-०३-२०२३ पर्यन्तम्) प्रावर्तत।






परिसरनिदेशकः आचार्यः सि.एस्.एस्.नरसिंहमूर्तिवर्यः कार्योन्मुखीकरणवर्गे नवनियुक्तान् शैक्षिकसदस्यान् उदबोधयत्।



मुक्तस्वाध्यायपीठस्य निदेशकः डा. रत्नमोहनझावर्यः कार्योन्मुखीकरणवर्गे देहलीतः अन्तर्जालद्वारा सर्वान् उद्दिश्य सम्प्रेरणाभाषणम् अकरोत्।

कू. वेङ्कटेशमूर्तिः (सहायकाचार्यः, मु.स्वा.पी.) कार्योन्मुखीकरणवर्गे प्रास्ताविकं वचनमब्रवीत्। पश्चात् अग्रिमेषु सत्रेषु कार्ययोजनां परिचाय्य अभिनवपाठ्यक्रमसरण्याः निमित्तं सिद्धतायै प्रैरयत्।



२४-०२-२०२३ दिनाङ्के तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठस्य कुलपतिचरः आचार्यः मिगनकल्लु लक्ष्मीनरसिंहमूर्तिमहोदयः सन्तुलितजीवनशैली समचित्ततया च कार्यकरणं च साफल्यस्य मूलमिति समुपादिशत्। पारम्परिकज्ञानसंरक्षणाय अध्यापकाः प्रयतेरन्निति च उदबोधयत्। सर्वान् उद्दिश्य कार्योन्मुखीकरणानि कानिचन उपदेशवाक्यानि अवोचत्।